कलापिका

डः वीरेन्द्र कुमार-भट्टाचार्यः

Published by :
Shri Shyamapada Bhattacharjee
Sanskrit Pustak Bhandar
38, Bidhan Sarani,
Calcutta-6

First Published—1969

वैजयन्ती-ग्रन्थमाला
तृतीय-संख्या

Price { Indian—Rs. 5·00
Foreign—Sh. 10-0

Printed by :
Debesh Datta
Arunima Printing Works
81, Simla Street,
Calcutta-6

FOREWORD

The present work contains fifty sonnets, not taking into account another—in the form of an inaugural utterance. So far as I am aware, sonnets in Sanskrit are offered here for the first time, at least as making up a complete volume. Quite a few of these appeared, periodically, in the pages of the monthly organ of the Sanskrit Sahitya Parishat, Calcutta. I am grateful to the learned Editor and Assistant Editors of that journal for having encouraged me in this new venture.

The sonnet has been a powerful instrument of succinct expression ever since Petrarch forged it and Shakespeare "unlocked his heart" "with this key", as Wordsworth said sonnetarily, so to speak. Michael Madhusudan Dutt introduced the sonnet into Bengali literature and Rabindranath adorned it, as he did everything he touched. Many modern poets have written elegant sonnets despite the current tendency to patronise free verse. But the sonnet was apparently unknown to classical Sanskrit poets, who would not even otherwise have favoured it because of its essential rhyme pattern. They had, however, a sort of poem called *kalāpaka,* consisting of four stanzas but only one grammatical sentence,—illustrated by Bhāravi in his *Kirātārjunīyam.* That is quite different from a sonnet in several ways. I have, none the less, coined the term *kalāpikā* to signify a sonnet, as it contains fourteen lines (instead of sixteen) on the same subject. I have also improvised the name *saṃstavaka* —collection of stanzas—to denote a sonnet. Of course, the appellation *kalāpikā* may mean just a small bunch of poems.

I have adopted the Shakespearean form of the sonnet in

my verses except in a couple, where the Petrarchan type has been resorted to. Recognised metres have been used in more than half the poems, but I found it necessary to invent a few metres, which have also been christened as in my drama *Kavi-Kālidāsam*. The names of all the metres will be found at the end of the text. My sole purpose behind invoking the aid of new metres was to avoid distortion of thought. Better skill in the handling of the ancient metres might have obviated the need for new tools, but a workman like me had little choice in the matter. I should point out, however, that the number of the longer metres of a specified size being limited, I had to cast about for fresh ones if only to escape monotony. It is for the experts to judge whether it was proper to rush in where savants fear to tread. But I accepted Browning as my mentor even though youth's manuscript is closed for me!

The linguistic medium is old, but—apart from the perennial topic of love,—most of the subject-matter of my poems is of topical interest, such as social aberrations and religious masquerades, scientific adventures as well as political somersaults. This will be evident even from a cursory glance at the titles of the sonnets. I should add that a few poems echo some of the best Shakespearean sonnets, though I would hesitate to call them even free translations. My own feeling is that the book strikes a new note in Sanskrit letters, but whether it was worth while to do so, I appeal to scholars to judge.

My publisher has spared no pains, nor expense, to make the volume presentable in respect of the get-up, and I cannot praise him too highly for his sincere interest and unbounded zeal.

Transport House
45, Ganesh Avenue,
Calcutta-13
August, 1969



निवेदनम्

कलापिकेति काव्यमालिका संस्तवक-ग्रथिता समर्प्यते रसज्ञकरकमलेषु मनाक् साध्वसेन मया। सनेट्-कथिता कविता प्रथमम् इतालियावासिना पेत्रार्केण नाम कविवरेण रचिता। तस्यां द्वौ भागौ विद्येते अष्टकं षट्कं चेति। पादाश्च अन्त्ययमकान्विता येषां विश्लेषणम् इत्येव—कखखक कखखक/गघङ गघङ। पश्चाद् इङ्गदेशीयो महाकविः शेक्सपियरो नवतरं संस्तवकं रचितवान् यस्मिन् अष्टकषट्कविभागो नास्ति तथा अन्त्ययमकानि भिन्नरूपाणि—कख कख गघ गघ ङच ङच छछ। मत्पुस्तिकायां मुख्यतः शेक्सपियर-रीति गृहीता भावप्रकाशसौकर्यार्थम्। न जाने संस्कृतसाहित्य-कोविदा मद्रचितानि नवीनानि छान्दसानि सादरं गृह्णीयु र्न वेति। परन्तु संजीवति साहित्ये नवनवविधीनां प्रयोजनमस्तीति मन्ये स्वयम्।

विषयवस्तूनां वैचित्र्यं विहितं मया यद्यपि प्रेमाश्रयाणां स्तवकानां प्राधान्यमस्ति। ईदृशेषु कतिषुचित् स्तवकेषु शेक्सपियरकाव्यस्य प्रतिध्वनिः श्रूयते। मद्रचिताद् एतद्देहमन्दिराख्याद् वङ्गभाषाग्रन्थात् केचन श्लोकाश्चानूदिताः। पुस्तकेऽस्मिन् भारतसंस्कृते स्तथा वर्तमानयुगप्रथाया आलोचनं कृतं समाजसंस्कारार्थमेव। अपि च, सुरभाषा शब्दमञ्जुला तथैतिह्यमण्डिता

समृद्धा नगरीरेव। तर्हि सा सर्वयुगानां मानवानां चिन्तानुभूतिकल्पना: सुष्ठु प्रकाशयितुं क्षमा। अतो मया चाधुनिकी विश्ववार्ता विवृता चित्तरससिक्ता।

कतिपयाः स्तवकाः संस्कृतसाहित्यपरिषत्पत्रिकायां प्रकाशिताः। तत्-सम्पादकेभ्यो धन्यवादं निवेदयामि विशेषतः ड० गोपिकामोहनभट्टाचार्याय न्यायतीर्थमहोदयाय। तत्रभवतां सादरोत्साहप्रदर्शनं विशेषेण स्मर्तव्यम्। पुस्तिकेयं चेत् सुधीभ्यो रोचते तन्मे प्रयासं सफलं गणयिष्यामि। जलमति-विस्तरेण।

काव्यं हि धर्मो मम न द्वितीयः
कालं च काव्ये कलयाम्यतन्द्रम्।
छन्दो विचित्रं रसिकस्तथर्षि-
र्लक्ष्मीः कलायाः खलु देवतैका॥

कलिकातायाम्
रक्षाबन्धनपूर्णिमायाम्
१३७६ वङ्गाब्दस्य

इति विनीतस्य
ग्रन्थकारस्य

मांगलिकी

अर्धस्फुटानां पुष्पकोरकाणां निर्माल्यमिदं मर्मतो
नास्त्यत्र बन्धो वर्णभाप्रकर्षौ वासन्तसुपर्णे यथा ।
तीव्रो न गन्धः कस्तुरीसदृक्षो लज्जाश्लथकोषे तथा
नाकुण्ठरागः किंच सिंचतीह प्रस्यन्दरसं सर्वतः ॥
जिघ्रन्ति दिष्ट्या चेत् सकृद्रसज्ञा नूनं जहतीदं ततः
कस्मै नु नित्यं रोचते रसोनं रिक्तस्य गुणैः का कथा ?
अर्घ्ये प्रपन्ने दीनतां कथं मे सद्गर्हणयाऽपि व्यथा
वासप्रलीनां जीर्णपुष्पमालां वायुः क्षिपतीतस्ततः ॥

किं मे तथापि क्षीणरागचित्रं नेत्राञ्जनचित्तोत्सयो-
र्वैचित्र्यमाहो यौवनस्य यस्मिन् सोच्चारकृतं निष्फलम् ?
आनन्दमात्रं स्वर्गसौख्यतुल्यं पश्यन्ति परं सूरयः
काव्यं च यूनां कल्पनां प्रणोद्य प्रीणाति चिरं विह्वलम् ॥
सौन्दर्यपूजा दिश्यते तु येन प्रेमा स हि मृत्युञ्जयः ।
तद्वन्दनार्थं चित्रगीतिमाल्यं हास्याश्रुचितं निर्मलम् ॥

संस्तवक-पंचाशिका

तनुतीर्थम्

रात्रिन्दिवं मे देहमन्दिरेऽस्मिन् संचिन्त्य विदेहरूपं
पूजार्चनार्थं वर्तते हि चेतो देव्या ननु वाञ्छितायाः।
प्रज्वाल्य दीपं कल्पनाप्रतीकं स्निग्धं च हृदार्तिधूपं
हुत्वा च तस्यै प्रेमचन्दनाक्तं पुष्पं मम कामनायाः॥

मुक्तानि सन्ति ज्ञानजालकानि स्वैरस्य तु मर्मराजो
रक्तानिलोऽतो मानसं प्रविष्टो जातश्च रसैः शरण्यः।
शङ्का क्व पूते मन्मथस्य गेहे कस्मादपि तीर्थभाजो
दिष्ट्या च नित्यं प्राङ्गणं श्रयन्ते सौम्याचरणा रमण्यः॥

स्फोटोन्मुखे वै प्रेक्षणे सरोजे काचिन्नु ददाति रामा
मञ्जूनि दत्ते चम्पकानि तन्वी कम्राङ्गुलिभिर्नु काऽपि।
ओष्ठाधरस्थं केशरामृतं मे यच्छेन्न तु नास्ति वामा
बिल्वस्य युग्मं दीयते सकम्पं वृन्तैकगतं कयाऽपि॥

रम्यव्रत्ता वा शर्मदा स्मितास्या यच्छति काम्योपहारम्।
स्यान्निष्फला मे मङ्गलारतिश्चेन् नौमि न कृत्स्नोपचारम्॥१॥

निर्मोचनम्

लङ्कायितुं ते कांक्षसे तु मिथ्या रोचिष्णु वरेण्ये मुखं
नेत्रप्रदीप्ता मंजुलाः कटाक्षा स्तूर्णं हि मया प्रेक्षिताः।
देदीप्यते ते देहरश्मिरुग्रो भित्त्वा सितं चीनांशुकं
नृत्यन्ति रेखाः स्फीतनिर्झरिण्यां लोलोर्मिचयैर्निर्मिताः ॥

व्रीडान्विता चेद् वल्लरी विवस्ते पत्रालिकृतं गुण्ठनं
कुत्रापि नान्धाः स्युः प्रवञ्चिता वा स्तोकेन तया छद्मना।
ज्ञातं मया च प्रेयसि त्वदीयं वाञ्छाप्रचितं कुण्ठनं
सर्वांगकान्त्या किं न कीर्तिता ते गुप्तप्रणयोन्मादना ॥

तन्मोचय त्वं लज्जया हि साकं स्वच्छावरणं चाञ्चलं
गृह्णामि हृष्टः स्मेरचारुबिम्बं द्रागेव मनोदर्पणे।
शंकां न कुर्या नात्र चोरयेऽहं लावण्यकणं प्रोज्ज्वलं
मिथ्याऽपवादं विद्धि राहुणैव ग्रासं शशिनो रञ्जने ॥

कल्पद्रुमात्मा प्रेमपुष्पधन्वा पूर्यते येन वाञ्छनम्।
मृत्युञ्जयात् स प्राप्तवान् वरं नो मुक्तये मोहलाञ्छनम् ॥२॥

कल्पलोकः

सद्यःप्रबुद्धो व्याकुलो वसन्त स्त्वामाह्वयति प्रेमिके
जागर्ति जोषं कामनाप्रसूनं कुञ्जे मनोरञ्जनम् ।
गुञ्जन्ति भृंगाः कोकिलाः प्रमत्ताः कूजन्ति निकेतान्तिके
वार्तावहस्ते यौवनोद्गमस्य प्रेमा कुरु तस्यार्चनम् ।।

कैशोरस्यश्चाधुना प्रयातः सङ्कोचलवो मर्मतः
सर्वान्तरश्री गच्छति प्रकाशं पीनांगवृता सत्वरम् ।
प्रांशुन्युरोजे प्रागुणुतो विलासं फुल्लाम्बुजयोश्च स्वतः
प्रस्वाद्य वासं स्वेदचन्दनोग्रं वायुः क्रमते मन्थरम् ।।

चित्रं निचोलं त्वं दधासि देहे रक्तांघ्रितले किंशुके
कर्णावतंसे बर्हिपुच्छसृष्टे मुक्ताचितचेलाञ्चलम् ।
ज्योत्स्नानिशीथे यक्षयोषिदेव प्राप्ते ह मयाऽऽगन्तुके
काव्यालकां मां रंहसा हि निन्ये भ्रान्तिः खलु सा चंचलम् ।।

स्वप्नहृदान्त र्यत्र केलिमत्तौ दृष्टाऽहमितो विस्मयम् ।
रोरुद्यते चेन्नूपुरोऽवकृष्टः क्रन्दामि तथैव स्वयम् ।।३।।

असंबाधः

अज्ञेयहेतो र्वासनाऽप्रमेया क्लिश्नाति मनो मे सदा
स्याद् गन्तुकामो मार्मिको मरालो हैमाम्बुरुचं मानसम्।
लोकालयं तत् सत्वरं हि हित्वा गच्छामि सुदूरं कदा
तिष्ठेत् पदांको मामको न पृथ्व्यां वक्षस्यपि साध्वसम्॥

शुक्तीश्चिनोमि द्राक् च यौवनस्य प्रोद्वेगपांशौ तटे
निर्याति लज्जा चित्तपीडनीया कुत्रावदमाद् दंशनम्।
आपृच्छते मामुन्मदस्तरंगः सिन्धोर्नु वक्षःपटे
झम्पाव्रतोऽहं रंहसा वृणामि स्निग्धं शमनालिंगनम्॥

संयाति दिष्ट्या स्रोतसाऽऽहृता मां तत्रैव रमण्याकुला
मृत्यो र्विचित्रे पुष्परंगमंचे स्यादस्य तया क्रीडनम्।
द्वीपं प्रवालै र्नर्मसंगिनी चेन्निर्माति विधातुस्तुला
चूर्णीकरोमि क्रूरपादघातै र्व्याघातमनुत्सारणम्॥

सान्ध्यप्रदीपो विस्फुरंश्च नूनं ज्योतिस्तनुते चंचलम्।
यात्रां करिष्ये सर्वबन्धहीनो रात्रामभि पूर्वाचलम्॥४॥

आविर्भावः

पादार्पणं ते मामके हि मार्गे यावन्न मृगप्रेक्षिणि
स्तोकं न जातं धूलिकीर्णभूमौ नेत्रोल्लसनं शाद्वलम् ।
वन्ध्या वनानी मर्म मे दुनोति स्तब्धा बत कल्लोलिनी
नाकर्णितं वा यौवनार्तकुञ्जे वासन्तरुतं विह्वलम् ॥

कर्मेषुविद्धा जीवनस्य युद्धे सर्वे दिवसा दुःखदा
दत्ते प्रदोषे मारुतो भयं मे चित्तस्य चिरं कम्पनम् ।
तन्द्राविहीनां यामिनीं नयेऽहं निःसंगगृहे सर्वदा
व्यर्थं बभूव प्रातरार्यसूक्तं क्रन्दस्यरुणालिम्पनम् ॥

त्वय्यागतायां मंगलक्षणे मे यात्रासरणिं दुर्दर्शं
स्निग्धः समीरो वाति मद्दिगन्ते शष्पाणि हसन्त्यध्वसु ।
वृक्षैः सनाथा भान्ति पुष्पवल्ल्यो नृत्यन्ति तटिन्यो भृशं
कूजन्ति हृष्टाः पक्षिणः समन्तात् चिन्ता मम चारुप्रसूः ॥

क्लान्तिः क्व कार्ये स्वप्नमण्डिता मे सान्द्रान्धकारा त्रियामा ।
रम्यासुपात्रं रञ्जयन् विनन्देत् प्रेम्णः सुरार्चिः प्रकामा ॥५॥

मुक्तपक्षः

कांक्षस्व मा मां बद्धुमात्मसृष्टैरीर्षानिगडैः समन्तात्
पुष्पं हि सद्यः पेलवं स्रवन्तं प्रेम्णो लुटति प्रलूनम् ।
भृङ्गाः प्रपन्ना यौवनातिरिक्ता रागारुणिताद्दिगन्तात्
हृत्कोषमार्गे पादचारचिह्नं चित्रार्पितमस्ति नूनम् ।।

वार्तावहोऽहं जीवनस्य राका-रात्र्यां तु मधोः सुतन्वि
संपूज्यदेवो मन्मथस्तथा मे चार्वाकमुनि र्वयस्यः ।
जाज्वल्यमानो वासनाप्रदीप्ते गात्रे खलु दाववह्नि-
र्हेतुश्च नित्यं भोगमात्रयज्ञे का तृप्तिरभाजनस्य ।।

आमन्त्रयेऽहं निष्ठुरे व्रते वा स्वीयामपि नात्र जायां
नो रोचते मे दास्यरूपकेलि र्दिव्यांगनयाऽप्यसह्यः ।
तुंगस्तरंगः प्रीतितीर्थसिन्धो र्जानाति न वप्रमायां
स्मृत्वा विमूर्तं लोलहर्म्यराशिं चूर्णी कुरुते प्रसह्य ।।

स्निग्धाम्बरे यो भ्राम्यति प्रकामं मुक्तपतत्रो विहंगः ।
तृष्णां नु तस्य स्वप्ननीडवासस्तृप्यति कुत्र प्रसंगः ।।६।।

निरुपमा

लोचने प्रियाया न विदिते कदापि शम्पांशूपमे
ओष्ठरागरश्मि जंयति न प्रबालदीप्ते रुष्णताम् ।
कोमले उरोजे न हसतो हिमस्य कान्ते र्वा समे
सान्द्रकेशपाशः सुरुचिरो न याति रात्रेः कृष्णताम् ।।

पाटलाति दूरं विचरता मयैव दृष्टान्येकदा
प्रस्फुटानि तानि क्व नु कपोलयो र्हि तस्याः प्रेक्ष्ययोः ।
सौरभं तरुण्यास्तनुलता तनोति कामं हर्षदा
सन्ति गन्धभारा जनयितुं क्षमास्तु मोदोर्मिं द्वयोः ।।

कामये सुवाक्यं रसयुतं सदैव तस्याः खल्वहं
तथ्यतस्तु जाने मधुतरं चिरेण संगीतं भवेत् ।
नाभिनन्दिता मे सुररमाः कदाच, किन्तु प्रत्यहं
छन्दसा भ्रमन्ती विलसति प्रियेह नामर्त्यै व्रजेत् ।।

दुर्लभाः समाना वरतनो र्यथा हि नारीसंसदि ।
दुर्लभं तथैव प्रणयिनो ममापि सादृश्यं यदि ।।७।।

मृत्युञ्जयः

उत्तालो जलधि श्चिरं सुचपलः फेनोर्मिलास्यव्रतो
बद्धुं प्रक्रमते प्रमन्थहृदयो वेलाञ्चलं वक्षसि ।
कालस्तीव्रगतिः करालकवले सर्वं प्रसीतुं रतो
दंष्ट्रा तस्य भृशं कृपाणनिशिता ध्वंसात्मिका प्रेयसि ।।

भूकम्पप्रहता लुटन्ति धरणावभ्रंलिहाः पर्वताः
शुष्यन्ति प्रबलैः खरांशुकिरणै र्नद्यस्तथा पुष्कराः ।
झंझावातरयः करोति लतिका वृक्षांश्च भूपातिता-
नाप्लूयन्त इह प्रणर्तितजलैः प्रीत्यालया गह्वराः ।।

आलेख्यं रुचिरं नृहस्तरचितं मालिन्यदोषं श्रितं
शिल्पोत्कर्षदलं चिरन्तनमतं चूर्णी कृतं रंहसा ।
सौन्दर्यं ललितं प्रयाति सदनं मृत्योर्हि शीतान्वितं
मुक्तिं त्वं तु कथं लभसे व्यालग्रहाद् भूयसा ।।

कृत्यं काव्यधृतं त्वदीयमपि चेत् कालात्यये तिष्ठति ।
प्रेमाक्ता तुलिका नरान्तरपटे रूपं च ते रक्षति ।।८।।

वासन्तिका

कि प्रज्वालयते नु किंशुकदलैः फाल्गुनः कामानलं
रक्ताशोकचयः सलज्जवदनः पल्लवे लुक्कायते ।
गण्डं रञ्जयते निजं पुलकितं वर्णतुल्या पाटलं
चित्रांकाश्च भुवः पलाशरचिता वक्षसि प्रेमक्षते ॥

फुल्ला पंकजिनी प्रसन्नसलिले कांक्षते वात्याञ्चलं
कल्लोलान्तरितं च हंसमिथुनं केलिमग्नं स्याद्ह्रदः ।
आम्रस्य प्रसवाः किरन्ति विपिने ताम्ररश्मिं पुष्कलं
गायन्ति भ्रमरा वितानिलये कोकिलैः मत्तैः सह ॥

अस्ताद्रेस्तिमिरं प्रयाति तपनो दिग्वधूभि र्गुण्ठितं
शम्पाभि र्नितरां विभाति गगने चन्द्रमा ज्योत्स्नाव्रतः ।
वल्लीवेदितलं सतृष्णतरुणैः कुंकुमेनालिम्पितं
चिह्नं केलिकृतां वसन्तसमये रागरक्तं सर्वतः ॥

पुष्पेषुप्रसितं यदद्य निखिलं हर्षहिल्लोलं गतम् ।
हिन्दोलो न कथं प्रणर्तयति नो मर्मणी वा साम्प्रतम् ॥६॥

प्रेमशक्तिः

तव प्रेष्यो जातः सखि कविरयं चित्तकक्षे निरुद्धो
विधातुं चेष्टेऽहं नियतमपि ते वाञ्छितं मन्त्रशक्त्या ।
दिवा वा यामिन्यां दिशसि यदि मे सेवकः प्रीतिमुग्धो
निदेशं ते धृत्वा प्रणतशिरसा साधयेयं हि भक्त्या ॥

गृहे स्थातुं शक्ये प्रतिदिनमहं तादृशी चेत् त्वदाज्ञा
प्रवासं यास्यामि त्वरितमथवा निश्चितं हर्षमग्नः ।
कुतो भृत्येन स्याद् विरचितविधि लंघनीयो हि राज्ञ्या
वियोगश्च प्रेयान् भवति मिलनात् कल्पनाकण्ठलग्नः ॥

मया सार्धं किंवा परवरनरैः कांक्षसे लास्यलीलां
न जिज्ञासे स्तोकं प्रणयविषये कुत्र ते मर्मतोषः ।
चिरं प्रेक्षे नारीं हृदयवसतिं सर्वथा पुण्यशीलां
तिलो गण्डाभोग स्त्रिदिवसुलभं मन्यते शर्म दोषः ॥

भुवि प्रायः प्रेमा श्रवणरहितो दृष्टिहीनो विमूढः ।
तथाप्यारूढः स्यात् प्रणयिपुरुषैः पर्वतः प्रांशुचूडः ॥१०॥

अनुशोकः

अन्येद्यु रार्ये त्वं समागता मे सद्म प्रसवै र्मण्डिता
ग्रन्थे निमग्नः प्रेमभाषणं ते वेद्मि स्म न कम्पान्वितम् ।
ज्ञाता न नारी कल्पलोकवर्या मत्प्रीतिकणाप्रार्थिता
किंस्वित् श्रुतं ते बाष्पवारिसिक्तं विस्फारनसक्रन्दितम् ।।

विस्मृत्य पाठं जालकं प्रति स्याद् दृष्टिर्मम निक्षेपिता
विद्युल्लता किं द्योतते नु कर्तुं गात्रं तव रोमाञ्चितम् ।
वक्षः कराभ्यामावृतं निमेषात् काञ्ची किल भूलुण्ठिता
शीघ्रं विदार्य मृग्यसि त्वमस्माद् ओष्ठाधरमौनश्रितम् ।।

आयास्युपांशु त्वं पुनो गृहं मे प्रेक्ष्यामलरूपाश्रये
वाक्यं ह्यजस्रं निर्झरस्रुतं च श्रोत्रे पतितं साम्प्रतम् ।
तुंगोर्मिमाला दिव्यदेहकान्ति र्भात्यद्य तु मर्त्यालये
लीलाब्जयुग्मं रक्तपादपीठं संचुम्बति रागव्रतम् ।।

सीमन्तमूले बालसूर्यवर्चो विभाति भर्त्राशुतोषम् ।
बाणै र्निषेधो निर्घृणो निषादो भिनत्ति मे मर्मकोषम् ।।११।।

वित्तहीनः

ग्रीष्मो भीष्मस्वरूपो व्यथयति जनं त्वत्तो विरहितं
नित्यं दन्दह्यते मे हृदयगहने वह्निः खरदहः ।
अन्तर्बाष्पो निरन्तो रचयति तथा वर्षाश्च चकितं
नेत्रे मे छादयन् हि स्रवति करुणो गण्डे जलवहः ॥

आयाते शारदर्तौ मनसि किमिव स्निग्धा हिमरुचिः
भाति प्रीत्या क्षणं तु स्फुटशशिकरै र्दत्ते सुहसितम् ।
पश्चान्मूर्तौ नियत्या शिशिरसमयो लोध्रच्छदशुचिः
क्लिश्नाति प्रागकोषं तदपि परुषः स्पर्शः परभृतम् ॥

वासन्तः काल एव प्रकृतिदयितः पुंश्चाटुचटुलः
फुल्लैः पुष्पै र्धरित्री नवकिशलयैः प्राप्नोति सुषमाम् ।
कुञ्जे गुञ्जन्ति भृंगाः कलकुहुरवै र्मत्तः पिककुलः
रम्यं सर्वं तथापि प्रणयिनमहो हन्तीव नितराम् ॥

आत्मानं हन्त मुग्धं तरुणि गणये राज्ञ्या हतकृपम् ।
यावन्नात्र प्रियाया हृदयगरिमा कुर्याद् वरनृपम् ॥१२॥

मर्मवाणी

यत्फल्गुप्रवहो निरन्तरमिह त्वद्वक्षसि प्रेयसि
गूढावर्तरयः क्वचिद्रचयते प्रेमोच्छलं निर्झरम् ।
अव्यक्तैषणया स किं विलपति प्रेक्ष्यारुणं चोषसि
हैमाश्मेऽपहतं निकुञ्जमुकुलं वृन्तालये जर्जरम् ॥

यत्रैव स्वपिति प्रभातसमये म्लानच्छदं पाटलं
वल्ल्यां रुदितं बतास्फुटमपि क्लिश्नाति दिग्योषितम् ।
यन्नीडं च तथा विहंगमशिशो नांकर्णयेद्वा कलं
नैराश्यध्वनिना भवेन्मुखरितं रात्रिन्दिवं निश्चितम् ॥

स्मर्तव्यं सततं तथापि रुदने नो निर्ममं वास्तवं
शाहारा-सदृशं तनोति धरणि स्मारं मरुं निर्दयम् ।
उद्याने महताऽऽलभेवहि सखि क्लेशेन शान्ते लवं
किं सद्यस्तमपि क्षयं गमयितुं चेष्टावहे नु स्वयम् ॥

अर्थाभावमये तुषानलमिव ह्यास्ये मनस्तापनम् ।
वात्सल्यं लभते प्रसूतिशापनं दुःखं दिवायापनम् ॥१३॥

वित्तशाली

भाग्येन प्रोज्झितोऽहं जगति सखि यदा बन्धुरहितः
चक्रन्द्ये शत्रुघृष्टः शपति च नियतिं क्लिष्टहृदयम् ।
आत्मानं निन्दयंस्तु प्रतिदिनमथवा भक्तिसहितः
भिक्षे स्नेहांशुरूपं वधिरसुरगणाद् इष्टनिचयम् ॥

दृष्ट्वा वा भाग्यवन्तं सखिजनसुमतं सुन्दरमुखं
कांक्षे तेनैव लप्स्ये प्रकृतिगुणचयं सम्प्रति यदा ।
एकस्य श्रीमनीषे अपरकुशलतां पुष्कलसुखं
वाञ्छामीह प्रकामं निजमखिलमपि स्तौमि न कदा ॥

दिष्ट्या कान्ते स्मरामि श्रियमपि तदा दैन्यनिलये
मूर्तिस्ते भाति चित्ते द्रवयति भुवि या सान्द्रतिमिरम् ।
आविर्भूतो वसन्तो मदनसहचरः शैत्यसमये
स्वर्गाच्च द्राक् सलाजः कुसुमपरिकरो वर्षति चिरम् ॥

सञ्जातो मर्मणस्ते निखिलवररुचि र्दिव्यविभवः ।
वित्तेशोऽपि क्व भपः क्व च खलु दयितः प्रेयसि तव ॥१४॥

सृष्टिलीला

श्यामश्रीबहुलं सदैव धरणेः प्रागोच्छलं प्राङ्गणं
कुर्वन्ती प्रकृतिः प्रसूतिरचनां तत्रास्ति भोश्छद्मना ।
कान्ताभिः क्रियते सुपौरुषमदै नित्यं मिथो रञ्जनं
सृष्टेः रम्यकृतं प्रणोदितमिह स्त्रष्ट्रा न शौर्यात्मना ॥

सौन्दर्यस्य पदे कृताञ्जलि रहः स्यात् पूर्वरागार्चनं
पश्चाच्च प्रणयो युनक्ति हृदये दुर्लक्ष्यतन्तुश्रिते ।
प्रायः पूरयते गृहं सचकितं स्वप्रालसं गुञ्जनं
मूर्ति र्दिव्यरुचिः स्फुटा तनुपटे मांसास्थिना निर्मिते ॥

यत्र स्यात् पुरुषस्तु वीर्यविरहितः पेशीश्लथो दुर्बलो
नारी यत्र न वा प्रयच्छति नृणां पथ्यामृतं भूतले ।
दुःखै र्विप्रकृतस्तयोः खलु रथो मार्गक्रमे निश्चलो
नूनं हन्त तयोश्चिरं कलरुतं युग्माभिसारो निष्फले ॥

द्वैतं सञ्चरणं हि कण्टकवृतं प्रेम्णा विना यन्त्रणम् ।
प्रीत्यंशुप्रसितं तु बन्धनमपि प्राणात्यये सान्त्वनम् ॥१५॥

सत्यप्रेम

बाधा नास्ति क्वचिदपि सुरमे पूर्वरागे विवाहे
प्रेमा बन्धो युवजनमनसो दुर्निरीक्ष्यो नितान्तम् ।
दिव्यज्योतिः कनकतनुगतं म्लायते न प्रदाहे
सत्यप्रेम त्रिभुवनविजयं विप्रकुर्यात् कृतान्तम् ।।

नित्यं तद्धि प्रणयिहृदययो र्वैध्नि चिह्नं स्मितास्यं
झञ्झायां चेत् क्व नु भवजलधौ कम्पते भीतिहेतोः ।
नक्षत्रं च ध्रुवकरलसितं क्रन्दसीचारुहास्यं
पन्थानं यद् दिशति नरगणं विभ्रमे मीनकेतोः ।।

कामं देहं रुचिरमपरं चात्र कालप्रशीर्णं
प्रेम्णो वीणा समयखलकृतैः कुत्र वा छिन्नतन्त्री ।
स्नेहस्यन्दं विरहखरकरै र्मानसं नास्ति दीर्णं
विश्वध्वंसे प्रणयकलरुति र्ध्वंसिनो दर्पहन्त्री ।।

भ्रान्तिश्चेन्मे मनसि वरतनो श्रावये त्वां प्रमाणम् ।
मिथ्या सर्वं हृदयसरसिजं निष्फलं प्रेमगानम् ।।१६।।

आवर्तनम्

अविरतमुर्मयस्तटमभि प्रयान्ति सिन्धूरसो
निमिषचयस्तथैव चलति प्रमत्तवत् प्रत्यहम् ।
विकचकदम्बकोरकसमो निरन्तरः किंच स
किमिव भविष्यलाषिणमहो चिरेण पश्याम्यहम् ॥

उदयरवि र्यथा नृतरुणः प्रकांक्षते वार्धकं
दरहृदयं तमेव कुरुते तमस्विनी शाश्वती ।
त्रसति सदैव स ग्रहणतो विलोक्य भीतार्भकं
वितरति कालकल्पविटपी विषाम्लिकां सम्प्रति ॥

समयकृतान्त उग्रनखरै र्भिनत्ति हृद्यौवनं
लिखति वरेण्यभालपटले कलंकरेखां यथा ।
सपदि निसर्गसुन्दरतनौ विधास्यते दंशनं
निखिलमपि स्वयं परशुना छिनत्ति नित्यं तथा ॥

तरुणि, तथापि काव्यनिचयश्चिरन्तनो मामकः ।
भवति विडम्बितः खलवरो जयेत ते स्तावकः ॥१७॥

दुर्दिनम्

आषाढस्य दिने प्रदोषसमये कृष्णाञ्जनाक्तं नभो
विद्युद्दाम बभौ मुहुर्जलमुचश्चक्रुर्भृशं वर्षणम् ।
वज्राघातचयः पपात धरणौ कालान्तकाग्निप्रभो
बालेन्दोश्च मुखं बभूव चकितं प्रच्छायदुर्दर्शनम् ॥

दुर्दैवेन वृतः करालतमसा सौभाग्यदीप्तशशी
नष्टं हन्त मम प्रवासशरणं वित्तार्जनं वर्तनम् ।
उन्निद्रस्तदहं विषण्गहृदयो दीर्णा रुजा प्रेयसी
प्रेक्षे दुःखकृतं तमिस्रगहनं शान्तिर्न लभ्या क्षणम् ॥

सान्द्रा सा जवनी बभूव चकितं दूरीकृता मायया
स्तब्धो वज्ररवो न वृष्टिपतनं लुप्ता च सौदामिनी ।
सद्यः क्रीडति च प्रसन्नगगने चन्द्रोऽम्बुदैर्लीलया
रिक्तं मे सदनं विनन्दयति किं ज्योत्स्नारुचा यामिनी ॥

पश्यामि स्म ततः प्रविश्य शयने पत्नीं प्रहर्षात्मिकाम् ।
तस्याः शीर्णमुखे स्मितैः प्रकटितां वर्षाशुचिं चन्द्रिकाम् ॥१८॥

हृतसर्वस्वः

किं त्वं पश्यसि मे तनो स्तनुतटे शीताक्रममये
प्रौढायुर्विटपं निरस्तविहगं पुष्पैश्च रहितम् ?
पत्रं वेपथुमत् प्रसह्य मरुता कीर्णं स्वनिलये
वित्तं श्यामरुचं विवर्णमधुना रिक्तं च विहितम् ?

वीतं दीप्रदिनं प्रयाति तपनो रक्ताभगगनं
दिग्बालाः सहसा रुदन्ति करुणं क्लिष्टाऽपि धरणी ।
तूर्णं कृष्णनिशा तनोति निखिलं विश्रामलषणं
मृत्योः सा भगिनी वृणोति निचुले पुंसश्च रमणीः ॥

द्रष्टासि ज्वलनं मदीयतनुकं तारुण्यसमिधं
होत्रा पुष्पशरेण दीप्तमनिशं प्रेमारुणहविः ।
चित्तं तिग्मपथं श्रयेत तरसा प्राणान्तकविधं
पुष्टो येन चिरं प्रदीनहृदयस्तेनाद्य हि कविः ॥

दृष्ट्वा सर्वमिदं किमार्तशरणं गच्छेदलसताम् ?
निर्विण्णं दयितं प्रदर्शय सखि प्रेम्णः शमिलताम् ॥१६॥

स्मृतिविलासः

स्मृतिपरिवसथे तु चिन्तारतोऽहं यदा सम्प्रति
हृदयगहनमास्त सुप्तव्यथाभि भृशं मर्दितम् ।
अनधिगतसुखं हि सन्तोषहीनं मनो वाञ्छति
विषमसुलभवस्तु विश्रान्तिजातं न मे प्रार्थितम् ।

नयनयुगमभूच्च बाष्पाम्भसाऽऽर्द्रं मनो विह्वलं
परमसखिजनाय मृत्यो निकेतं गताय क्रमात् ।
किमिव हि विललाप चित्तं प्रियायै पुनश्चञ्चलं
विगतरुचिरदृश्यमात्मा ययाचे स्मृते र्मन्थनात् ॥

नियतदलितमर्म चेतूथं रुरोदासकृत् कातरं
पुनरपि ववृधे च शोको हुताग्नि र्यथा सर्पिषा ।
किमिति न गलितं नु पूर्वं मदक्ष्णो र्व्यथानिर्झरं
मदनविशिखभिन्न आहो न दग्धोऽहमीप्सार्चिषा ॥

त्वमसि तु हरिणाक्षि यावन्मयैव स्मृता सर्वथा ।
जगति किमपि भाति तावत् सुखेन्दुः प्रयाति व्यथा ॥२०॥

विस्मरणम्

प्रयामि शमनालयं वरतनो दूरं यदाऽहमितः
चितानलशिखा तदा दिशति मे पन्थानमूर्ध्वगतिम् ।
किमात्मविहगश्चरेन्नवग्रहे स्नेहार्चिषा रहितः
किमु प्रियजनो भुवः स्मरति न स्तोकेन शून्यरतिम् ॥

त्वयाऽपि यदि दृश्यते सुनिभृतं मर्माक्षरा कविता
विनन्दयतु पाठिकां रसमयी न स्मर्यतां रचकः ।
स्वयं न खलु कामये मनसि ते दुःखायति भविता
वरं चिरमये वसेदपठित स्तुच्छो मम स्तवकः ॥

पुनःपुनरहं ब्रुमे हितवचः कर्णे कृथा ललने—
न कार्यमवनौ त्वया विरहिणो नाम्नोऽपि मे स्मरणम् ।
सहे न ते वियोगजं नवतरं क्लेशं कृपार्द्र जने
वरं हि मम मृत्युना शशिमुखि प्रेमृणश्च ते मरणम् ॥

कथं नु रुदतीं च मे प्रियतमां दृष्ट्वा बुधा नियतम् ।
वदेयुरियमंगना वरयते भाग्येषुणा निहतम् ॥२१॥

जगद्वैचित्र्यम्

अनवरतमहो प्रवञ्चितो भृशं खलैरवाञ्छितैः
सखिजनरहितः प्रकाममात्मनः करोमि निन्दनम् !
छलयति कुमति विवष्टि मन्मथः सदैव लिप्सितैः
प्रणयविलसनं तनोति जिह्वया विलासवन्दनम् ॥

घटितमिह सदा सितांशुधर्षणं कलंकराहुणा
विटखलकरैरुपांशु छद्मना कलत्रलाञ्छनम् ।
गुणिजनसुयशो हरन्ति पामराश्छलात्मकागुणा-
स्त्रिभुवनजयिनः क्रियेत भीरुभिः पराभवार्चनम् ॥

रुचिकृपणनृपो ददाति शृंखलं सुदक्षशिल्पिने
निपुणकविवरं विहस्य मोदते चिरं मूर्खता ।
किमिति जगति नेर्ष्यति क्व बालिशः परं हितैषिणे
नयनखरशरैर्मनस्तुदन्ति या नरा नमन्ति ताः ॥

निखिलपरिचयं विचिन्त्य रंहसा गतोऽस्मि विस्मयम् ।
स्पृहयति कवये प्रियेति चिन्तनात् श्रये न मे लयम् ॥२२॥

पुनर्जन्म

ग्राह्यं केन स्यान् मम रसरुचिरं काव्यं भविष्यांगने
सत्यान्वेषित्वाद् यदि वितरति तद् रूपं हि ते निर्जरम् ?
भूतार्थं वेद्मि क्व तदपि करितुं शक्ता मसी रञ्जने
दीप्रज्योतिर्न प्रकटितमिह ते गुप्तं हृदो निर्भरम् ॥

दिष्ट्या दिशेऽहं नयनचटुलतां किंवाऽङ्गवल्ल्या रुचि
छन्दःसंगीतैः किमु परिगमितं कण्ठारवैं नर्तनम् ।
सन्देहोद्विग्नो वदति सहसितो "वाचं सहे नाशुचि
कल्पार्कः कुत्र ज्वलति मरतनौ मिथ्या कवेः कीर्तनम्" ॥

कष्टं भो नष्टं भवति कविकृतं कीटौष्ठसंचुम्बितं
जीर्णं पत्रं नु स्थविररसनया मूकीयति स्तावकम् ।
प्राज्ञा मन्यन्ते त्रिदिवगुणवचः स्वप्रालसं जल्पितं
नार्चन्ति प्रेमृगः सुललितमुकुलैः पादोत्पलं तावकम् ॥

सन्तानं किन्तु प्रभवति यदि ते दिव्यार्चिषा बिम्बितम् ।
जीवेस्त्वं तस्मिन् पुनरपि रचने स्यान्मे जगद् विस्मितम् ॥२३॥

द्वैताद्वैतम्

नैकात्म्यं गणयेः कदापि प्रणयं प्रेमिकयो र्जनयो-
द्वैतं मन्त्रयते तनोः काम्यवने युग्मरथे मिलनम् ।
अद्वैते कृतः प्रमायाकुहकै ब्रह्मविदो विलयो
लुप्ते भेदचये विवर्ते जलधौ दुष्करसन्तरणम् ॥

उभौ वाक्यरतौ प्रियः प्राणसखी प्राप्य लसन्निलयं
द्वौ तौ यो हि मरुत् सपर्यां लभते पूजति यः पुरुषः ।
अर्चंश्च प्रणयी प्रियां दिव्यरूपां मृग्यति तत्प्रणयं
का पूजा क्व वचः किमार्ये मिलनं द्वैधलये वपुषोः ॥

मिथ्याऽद्वैतवचो मृषा द्वैतमतं फल्गु चिरं द्वितयं
द्वैताद्वैतयुतं परार्थप्रकटं विश्वरहोवचनम् ।
युक्ते किन्तु यदा तनू द्वे मिलने प्रेम परैति लयं
सायुज्यं लभते तनुश्चेन्मनसा मुक्तिसुखं मिलनम् ॥

तुल्ये गुह्यमते समाने हृदये यत्र कृते सदृशे ।
कान्ताप्रेमिकयो र्भवेद् युग्ममन स्तृप्ततृषं सुदृशे !!२४॥

प्रेममाया

केचिद्वा गणयन्ति दोषमपरं रूपं च ते यौवनं
दृष्टास्तु त्वयि कैश्चन प्रियसखि श्रेष्ठा गुणाः पुञ्जिताः।
कांक्षेऽहं सततं भवादृशजने दोषै र्गुणप्लावनं
दोषाः प्रेष्ठगुणीकृता स्तव तनौ हृद्वह्निना संस्कृताः ॥

तथ्यं वेद्मि तु यद् वदामि तदहं राज्ञ्या उरस्तोयजे
हारः शुक्तिमयो नितान्तसुलभो यायाद्धि मुक्तादृशम् ।
यद्यत् स्यादनृतं कलंककलुषं पापव्रते मर्त्यजे
सत्यं भोस्त्वयि तत्तदेव नियतं प्राप्णोति पुण्यार्चिषम् ॥

शार्दूलेन यदा कुरंगनयनं लोलायतं लभ्यते
निस्त्रिंशः खलु लीलया बहुमृगान् हन्तीतरान् प्रत्यहम् ।
मायाजालमिह त्वया यदि सखि प्रेम्णो हि विस्तीर्यते
नूनं त्वं कुरुषे चिरं तनुभृतां मूढात्मनां संग्रहम् ॥

मा मैवं तु सकृत् कुरुष्व कृपणे यच्छामि ते मन्त्रणम् ।
निन्दावाङ् ननु तावकं किमपि मे कुर्याद् हृदो यन्त्रणम् ॥२५॥

स्नेहच्छद्म

कान्ता पृच्छति मे यदा भ्रुलसितैः "किं न सत्यव्रतेयं"
"नूनं त्वं हि तथा" वदामि तरसा, वेद्मि मिथ्या वचस्तत् ।
नो चेत् सा कितवं तु मां गणयते दुर्णयं चाप्रमेयं
संसारस्य विधौ पटु क्व वचनं सत्यमप्यप्रियं यत् ॥

मन्ये सा मनुते हि मां किमिव प्रौढिपन्नं युवानं
जाने यद्यपि मे वयः खलु तया ज्ञायते मर्महर्या ।
मिथ्या सा रसना मया बहुमता कीर्तितं छद्मगानं
कुर्वौ द्वौ गुणकल्पनामुभयतो लभ्यते नौ सपर्या ॥

सत्यं तर्हि मया कथं न कथितं "यौवनान्ते स्थितोऽहं"
मिथ्या किंच किमर्थमीदृशमये भाषते द्रागनन्या ?
प्रेमूणः कल्पतनुश्चिरं वरयते छद्मवासः प्रमोहं
कृष्णे स्निह्यति रुक्मिणी न तु तथा सत्यभामा शरण्या ।।

मिथ्याऽतो मधुरं धनी भणति मां सा च मे विप्रलब्धा ।
चित्तं नन्दयते प्रियानृतं वचो दुःखदा रूक्षशब्दाः ॥२६॥

सञ्जीवनी

न ताड्यम्ते यैर्हि प्रवरपुरुषैः पीडाक्षमै र्दुर्बला
न यै र्लोकातीतै र्विमलचरितै र्निःश्रेयसं काम्यते ।
प्रणोद्यान्यात् ये च स्थिरमतिजना दुःखे सदाऽविह्वलाः
प्रतिष्ठाया हेतोः खरदहतुला तृष्णा च यैः शाम्यते ॥

त एव प्राज्ञाः स्यु र्निखिलभुवने त्रैगुणवीतान्तराः
प्रकृत्या समृद्धा रुचिरतनवः स्वर्गश्रिया मण्डिताः ।
त्यजन्ति प्राणांस्ते शुचिहसयुता जीवन्ति चेच्चापरा
भजन्ते तानेव प्रतियुगमतो मूर्खास्तथा पण्डिताः ॥

प्रफुल्लं यत् पुष्पं किरति सुरभिं जीवेन्न तत् चात्मने
वसन्तः प्रीणीते हसति पवनः संभुज्य तस्यामृतम् ।
सुगन्धप्रकाशो न भवति यदा वल्ली तदा रञ्जने
तृणत्वं प्राप्णोति स्मरति न तु सा सिद्धिं लभेतानृतम् ॥

सुतन्व्याः प्रेमार्चि र्जनयति शिखां कान्तस्य सन्दीपनीम् ।
सुधौष्ठाधारे किं प्रियतनुभृते दद्यान्न सञ्जीवनीम् ॥२७॥

काव्यामोदः

मृत्योरासंगे स्वपिमि सुनयने हैमशीते दिनान्ते
हित्वा सर्वं मे ललितमललितं शब्दचित्रं धरण्याम् ।
दिष्ट्याऽक्ष्णोर्मार्गे पुनरिह पतितो ग्रन्थराजि मनाक् ते
मन्ये सेवित्वा क्षणमपि कुरुषे काव्यलक्ष्मीं सुधन्याम् ।।

काले काले स्यान् नवकविरचितं नव्यकाव्यं प्रशस्यं
यायात् छन्दोघ्यं सुरुचिरतरतां मत्कृते नित्यमेव ।
तूर्णं चेत्तन्वि स्मृतिविरलपथात् स्रंसते मद्यशस्यं
भूयान् निर्माल्यं मम रसरचनं संस्तुता यत् त्वमेव ॥

यच्छ्रेमह्यं च प्रवरवरमिमं रम्यचिन्तं पवित्रं
नित्यं यत् स्फूर्तं ननु तव मनसि प्रेरणान्मीनकेतोः ।
"कान्तो मे नूनं विरचयितुमलं काव्यमाल्यं विचित्रं
कण्ठस्तस्याभूत् कलरवरहितः केवलं मृत्युहेतोः" ॥

यावत् सञ्जाता अति तव दयितं छान्दसा वा कदापि ।
काव्योत्कर्षात् त्वं पठ नवरचनां प्रेमहेतो ममापि ॥२८॥

अनिर्वचनीया

आ सृष्टेः प्रीत्या कृतमित नरै र्वन्दनं वै रमण्या
वेदे वेदांगे सुललितगिरा काव्यजाते कथायाम् ।
ब्रह्मज्ञा आचंस्तरलिततनू र्मोक्षदा मञ्जुकन्या
ध्यानेन प्राप्तं फलमपि ददुः पादयो र्वैदिकायाम् ॥

ग्रन्थे प्रासादे गिरिदरिचये चित्रितं कल्परूपं
दृष्टा नान्यत्र त्रिदिवतरुणी प्राणभृन्मर्त्यगेहे ।
आस्यं वक्षोजं हरिणनयनं मध्यमं नाभिकूपं
सर्वं पश्यामि स्मरदरशरं वास्तवं ते सुदेहे ॥

मन्त्रद्रष्टारो मनसि ददृशू रूपमेतत् प्रकामं
वर्णाढ्यैः किंच प्रचुरगुणिभि र्वर्णितं शिल्पपुञ्जे ।
वन्ध्यं मन्ये ते निरुपमतनोः संस्तवं निर्ललामं
स्तोकेनागीतं परभृतकलै र्यद्यपि प्रेक्ष्यकुञ्जे ॥

पुण्यो प्रेमा ते दयितहृदयं किं न कुर्यादशोकम् ?
भित्त्वा वाग्जालं चलति तरसा मर्म किंस्विद्द्रलोकम् ॥२६॥

पुष्पबाणवल्ली

आसीदेकदा देवः पुष्पधन्वा सुप्तिमग्नो नन्दने
बाणास्त्वाहृताः श्रुत्वा रङ्गिणीभि र्भृंगयूनां गुञ्जनम् ।
पश्चात् स्थापिताः सर्वे पात्रगर्भे रक्तवर्णे चन्दने
निष्पीड्य क्रमात् स्वर्गोदूखले च प्रस्तुतं नेत्राञ्जनम् ॥

वर्णाढ्यं परं स्यादिन्द्रायुधार्चि र्मर्त्यभूमौ दुर्लभं
मन्ये मर्मभित् तादृक्षं तु नास्ति स्वर्गकन्यापक्ष्मके ।
रूपं चक्षुषो गच्छेच्च प्रकर्षं चेत् प्रलिप्तं सुप्रभं
षष्ठः सायकः सञ्जातो हि तस्मात् पुष्पितेषो स्तूणके ॥

अनेद्यु स्तु मे चित्तं विप्रलुप्तं दृष्टिबाणै र्योपितः
किंस्विन्मन्मथात् प्राप्तं दीप्तिमत्या मोहनं नेत्राञ्जनम् ।
का मन्त्रौषधिः किंवा भेषजं कः स्यात् प्रलेपो वाञ्छितो
गच्छामि क्व मे ज्वालानाशनार्थं कुत्र लभ्यं सान्त्वनम् ? ।

स्थानं विद्यते न स्वर्गे धरित्र्यां केवलं कान्तोरसि ।
सर्वे सायका यस्याः संगृहीता मामिका सा प्रेयसी ॥३०॥

भ्रष्टलग्नम्

स्तब्धायां रजनावलं कलरवैर्लास्योच्छलैः रंजने
न त्वं नर्मगृहे शृणोषि सखि किं दूरागतं क्रन्दितम् ?
क्षुद्वह्निः परितो निरन्नकुटिरे दन्दह्यते चांगने
मारीश्वासविषं तनोति सुरभिं मन्दानिलैर्वाहितम् ॥

कीटैर्दष्टमहो प्रसूनरचनं दीपश्च नष्टप्रभः
पर्यंके चकितं कृतं सुकरुणं तन्द्रालसं शयनम् ।
कामस्याद्य कथं सुधात्मकलसे कालान्तकूटाप्लवः
क्रन्दस्यां स्फुरितं न दृष्टमथवा रक्ताक्षरं लेखनम् ? ।

काञ्ची स्वर्णमयी कटेः श्लथयते चेलाञ्चलं लुण्ठितं
निर्लज्जं द्वितयं चिरं हि गणये नग्नच्छलं दुःखदम् ।
हारस्ते रुचिरा प्रबालखचिता दीनाक्षि बाष्पाञ्चितं
कुण्डलं कुरुते वराकदलनं व्यंगैषणं त्वंगदम् ॥

कंकणं किमिति सुनिक्वणकरं क्लिश्नाति कांक्षावशम् !
मंजीरं चरणे मुमूर्षु विरुतं क्लृप्त्वा मृशेन्मानसम् !!३१॥

मृगतृष्णिका

उद्यानरूपं योवनार्च्यदेहं प्राप्य क्रमशो वसन्तं
गुंजन्ति भृंगा रौति कोकिलो मे चित्तस्य रहोनिकुंजे ।
द्वारं प्रपन्ना पाण्डुरप्रदोषे प्रोद्भास्य हसं दिंगन्तं
मूर्तिं दधाना कल्पनारुचिं त्वं दिव्यामयि कान्तिपुंजे ॥

दिग्बालिकाया श्चारुपुष्करास्ये सिन्दूरकरैः सरागं
सीमन्तलेखां मुद्रयन् दिनान्ते मन्दायत उष्णरश्मिः ।
लब्ध्वा च भाले प्रस्फुटं ललामं लज्जाशुचिपद्मरागं
लुक्कायितं द्राग् अञ्चले मुखं ते विद्युल्लतया क्षतोऽस्मि ॥

रम्यांशु चित्रं शोणितांकितं ते स्पृष्टं मम मर्मतोषं
स्वप्नात्मकं मे कामनाप्रदिग्धं यस्याथ चिरप्रतिष्ठा ।
दत्तश्च तुभ्यं न द्वितीयनार्थैं प्रीत्यंजलिरत्र जोषं
प्रेम्णः प्रमत्तं चापलं विलुप्तं जाता हि परार्थनिष्ठा ॥

त्यक्तः मयादौ वास्तवं बताहं किंस्विन्मृगतृष्णिकार्थम् ?
तन्व्यास्तटिन्या स्तीरभूरनाप्ता वांछा किमु वंचनार्थम् ॥३२॥

मिथ्याचारः

रूपं तेऽपार्थिवं रचयति मर्त्यं सुषमेन्द्रजालं
किं नु स्याल्लज्जितं वरतनुगन्धात् सखि पारिजातम् ?
वैभ्राजं स्वार्चिषा मुकुलितनेत्रं कुरुते विभातं
पीयूषस्यन्दनं शशिकिरणास्यं त्रिदशार्च्यभालम् ॥
स्वप्नावेशादहं सुरसतटिन्यां हि नयामि कालं
मन्ये मृत्युञ्जयं मनसिजरक्तं मरवस्तुजातम् ।
प्राणानां नन्दने श्वसिमि च नित्यं मलयाद्रिवातं
मुग्धं मे मानसं रणितमिवात्ते चरणोत्थतालम् ॥

मायाकल्पद्रुमे प्रथमदिनान्ते म्रियते प्रसूनं
प्रेम्णो हा सौरभं भवति विलीनं हिमशापहेतोः ।
मर्माख्या वल्लरी खरमरुभूमौ लभते पराधिं
जीर्णाः पञ्चेषवः श्लथयति मौर्वीं ननु मीनकेतोः ॥
क्षामच्छायातनुः सपदि वृणीते शरणं समाधिं
मिथ्या नौ यौवनं छलकलपूर्णः प्रणयश्च नूनम् ॥३३॥

रूपतृष्णा

नित्यमा जन्मतो भ्रमन्ति मानवा रूपतृष्णाचञ्चला
लभ्यते कुत्र वा सकृत् परिक्रमे दिव्यरूपं रञ्जनम् ।
हन्त चक्रन्द्यते हृदो विहंगमी विप्रलब्धा विह्वला
कर्णयोः श्रूयते मधुप्रकांक्षिणः कुण्ठिताले गुञ्जनम् ॥

चारुता भास्करे न चन्द्रतारके दृश्यते नीलांगने
चित्तमाकांक्षते वरेण्यरूपभां प्रेमदीप्त्या मण्डिताम् ।
सन्ति रात्रिन्दिवं सपुष्पकोरका रम्यवल्ल्यः कानने
रोचते मर्मणे न तत्स्मितांशुकं किंच कान्ति यौषिताम् ॥

पंकजैः प्राप्यते मृणालपीडनं पाटलं दुष्कण्टकं
कुत्र पुष्पासवं पिवामि लोभनं दंशनं भृंगैर्विना ?
मानिनीमानसं छलात्मकं सदा देहरूपं वञ्चकं
लभ्यते कुत्र वा विषादवर्जित श्चित्तमोदःप्रेमिणा ?

नूनमा जन्मनः सतृष्णलोचनं रूपदृष्टे वञ्चितम् ।
प्रेम रूपार्थि नो मनः सवाञ्छनं छद्मना वै लाञ्छितम् ॥३४॥

मोहमुक्तिः

अनिन्द्यं प्रिये रूपं तनोस्ते तनुतेऽद्यैन्द्रजालभं
भृशं निन्दितो मन्दाररागः खरसीमन्तवर्चसा ।
लसल्लोचने ज्योति र्विभातं त्रिदिवोद्यानकप्रभं
स्मितास्याच्चिरं वाक्यामृतं च क्षरति प्रायशोऽञ्जसा ॥

न दिव्यांगने प्रेमास्ति चित्ते धरणे वल्लभाय ते
परं लभ्यते हृद्योपहारैः स्मितगूढं विडम्बनम् ।
सबाष्पाम्भसा यावन्मयैव प्रसवप्रेम दीयते
कथं रंहसा तावच्च तन्वि त्यजसि क्रीडनांगनम् ॥

भवेत्तन्मृषा प्रेमाथ मिथ्या छलदीप्ता मरीचिका
प्रयातु द्रुतं तृष्णा श्रयेऽहं वरवैरागभूषणम् ।
स्वहस्तेन च स्यादंकिता मे परिभूते र्ललाटिका
यतिष्ये क्व वा स्वप्नातुरोऽपि प्रमदामर्मतोषणम् ॥

हृदः शोणितं स्वीयांघ्रियुग्मे कुरुषे किं न्वलक्तकम् ?
गृहाणान्तिमं प्रीत्यञ्जलिं मे कवितारक्तकोरकम् ॥३५॥

उन्मादना

यावज्जीवमये विचित्रभुवने पास्याम्यहं सर्वथा
प्रागस्यन्दजलं नृमर्मसरसि स्वर्गेऽपि यद् दुर्लभम् ।
संगीतं ललितं करोम्यविरतं वैभ्राजकुञ्जे यथा
नित्यं निर्झरवत् तनोमि लहरं हर्षान्वितं हृद्वरम् ॥

शिष्टाचारचयः समाजरचितो निर्मोकमात्रं छद्मनः
प्रायो नीतिवचो विमूढदलनं फल्गुस्वनं गर्हितम् ।
सर्वं जाल्मकृतं विनिन्द्य वरये निःश्रेयसं चात्मनः
छन्दः स्वच्छरुचं सलीलमिह मे कूटं चिरं वर्जितम् ॥

मण्डूकान् गणये धुरन्धरवरान् कूपस्थितान् सर्वदा
क्लेदाक्तं सलिलं हि यैर्बहुमतं मन्दाकिनीजीवनम् ।
लोलोर्मिः प्रगतेस्तु तैर्विगणिता नृणां भृशं दुःखदा
शोचन्तीह च ते पुरातनमतं मुक्तेरपिणां बन्धनम् ॥

चित्तेऽहं स्थविरे विधातुममितां मोक्षात्मिकां कामनाम् ।
शङ्खारावमुदा किरामि धरणौ यूनां हृदुन्मादनाम् ॥३६॥

दुर्भिक्षम्

सद्योजाताय भ्रमति नु शिशवे किं राक्षसी रंहसा
सन्तानासंगाः सकरुणनयनाः कुर्वन्ति चक्रन्दनम् ।
उड्डीयन्ते च प्रकटितपुलका हर्षाकुला वायसा
दिङ्नार्यः स्निग्धा विगलितहृदया वर्षन्ति नीराञ्जनम् ॥

कंकालीभूतै रगणितमनुजै द्वारावती मर्दिता
मन्येऽद्य प्रेतै र्विकटविवसनै र्धृष्टं धराप्रान्तरम् ।
दुर्गन्धग्रस्ता स्तनुविवरमलाः सर्वत्र पुञ्जीकृता
लास्यै र्निर्लज्जै र्नरकविलसनै र्मुक्तांगनं कातरम् ॥

पित्रा विक्रीतो विरलवसुभृता हा वासुदेवोऽर्भको
निर्विण्णा मत्ता शपति च वधिराम् आ देवकी देवताम् ।
सीमन्तिन्या वा नभसि किमु कृतः प्रश्नः सतीत्वार्थकः
सानन्दो नन्दः किमु सहवसते पत्नीं श्मशानं गताम् ॥

उल्लासक्षिप्ता दिशि शकुनिशिवाः खादन्ति नृणां शवान् ।
किंराजा कंसो निजजयमुदितः सम्भाषते दानवान् ॥३७॥

असंगतिः

"आत्मा पक्षिसमः स्थितस्तनुपञ्जरे न मरः स्वयं
नष्टायां मरणे तनौ परमां गतिं स समीप्सति ।"—
नेदृक्षै र्वचनैः कृथा खलु मन्द्रितं श्रमिकाश्रयं
येषां प्राणतरी सदा भवतोयधौ हि निमज्जति ॥

संख्यातीतनृणां क्षुधातुरजीवनं सविडम्बनं
स्वर्णक्रीडनकैः परं विलसन्ति ये धनगर्विताः ।
जीवात्मा हि परात्मको वदतीति नश्विरदर्शनं
यन्त्रीभूतनरा मया परितस्तु किं न्ववलोकिताः ॥

हंहो भारत विस्मरे स्तव संस्कृतिं हि कलंकितां
छिन्ध्याचारकृतं हृदश्चिरखञ्जकं दृढबन्धनम् ।
पश्याद्यात्र पताकिकीं जनतां भृशं बलदर्पितां
नव्यस्वस्तिकवाचनै र्ननु दीयतामभिनन्दनम् ॥

आत्मानं गणये स्तनूविटपं मनो मृदुपल्लवम् ।
प्रेम प्रस्फुटकुड्मलं रमयन् मधावलिवल्लभम् ॥३८॥

कर्मफलम्

"अधिकारस्ते कर्मणि केवलं न फले संलभ्ये तस्य"—
गदितं नैतत् प्राक्तनसम्मतं गणये स्तोकेन श्लाघ्यम् ।
बहुधा व्याख्या वेद्मि महात्मभी रचितेति श्लोकार्धस्य
प्रमितिक्षीणाः प्राकृतमानवा विलपन्ति स्मृत्वा भाग्यम् ॥

नियतं जाता मृत्युसमाश्रिता धनहीनाः संख्यातीता
गणयन्ते ते हन्त मनुष्यजं विषमं देवानां दानम् ।
लघुचेष्टाभि र्दुःखचयं स्वयं खलु दूरीकर्तुं भीताः
कुटिलादृष्टं ब्रह्मपदं परं किमिति प्रेष्ठं नु ध्यानम् ॥

अनिशं तत्त्वं व्याकुलमानसैः परलोकान्तो विज्ञातु-
मिहलोके हा हन्त कृतं नरैः सुविशालं वन्दीसद्म ।
यदि देहान्ते स्वर्गसुखान्विताः करुणाहेतो र्वै धातु-
र्वसति कुर्युं र्भूतल-रौरवे ज्वलदग्ने र्ग्रासो नर्म ॥

विषयौदास्यं छद्मविरागजं विनिहन्तुं प्राणप्लावैः ।
सुरसां वांछाभोगवतीमहं वरये धीशङ्कारावैः ॥३६॥

पूजापरिहासः

विचित्रमतीव वंगीयजनानां गेहेषु देवार्चनं
सुरा ननु यत्र नाम्ना त्रिदशाः स्यु र्मर्त्या तु चित्राङ्गनाः ।
सुचित्रकराश्च शिल्पप्रतिभायै यच्छन्ति मृत्तर्पणं
पुरोहितमन्त्र आर्षध्वनिकल्पः शास्त्रार्थिनो यन्त्रगा ॥

समं युवकैस्तु वृद्धै र्विहितं स्यान् मृत्पुत्तलैः क्रीडनं
दिवा रजनौ च गीतं लघुतानं का कस्य वा लाञ्छना ।
विसर्जनदृश्यमार्यैतरभोग्यं नृत्यादिना हर्षणं
प्रयाति सदैव चित्तं विटलोकं हा घृण्यपूजैषणा !

यतः सुरसद्म धीमन्दनराणां स्वप्नातुरं कल्पनं
सुरार्चननाम वित्तार्जनवृत्तं स्वार्थैषिणां जालमता ।
कथं सुधियश्च कुर्वन्ति समन्ताद् बाष्पाप्लुताः क्रन्दनं
विधर्मिरति र्हि नूनं चिरवर्ज्या जाड्यप्रसू र्मूढता ॥

ददाति नराय मिथ्या कुरुचिं च प्राणात्यये दुर्यशः ।
न निन्द्यमतं तु गृह्णातु वरेण्यो भूयान्न वा तद्वशः ॥४०॥

जम्बुद्वीपम्

नरा जम्बुद्वीपे द्रविणबहुले वसन्ति न वाञ्छिता
धनादे स्तृष्णाऽद्य प्रभुजनमपि प्रणोदयते भृशम् ।
शठानां चौराणां जयकलरवै र्दिशो निशि मन्द्रिता
न जाने देशोऽयं जगति लभते यशः खलु कीदृशम् ।।

गुरोरन्तेवासी विनयरहितो विधास्यति निन्दनं
श्रमं निन्द्याचारं गणयति सुधी र्निजार्हणगर्वितः ।
परद्रव्याणि क्व प्रवरपुरुषा लषन्ति न वा क्षणं
शठे शाठ्यं नैव प्रणतशिरसा भवेदिह वन्दनम् ।।

प्रजा जन्यन्ते हि प्रतिगृहमहो प्रकामरतै र्नरैः
सुतुंगप्रासादैः कुटिरसहितैः क्रियेत सतां व्यथा ।
श्रितं वैरागं च त्रिवलिरुचिभि र्न मोक्षतृषान्तरैः
नवा विश्वे देवाः पटुचिटनटाः कलंककलात्रताः ।।

अहो जम्बुद्वीपे नरकजलधौ चरन्ति नृजम्बूकाः ।
निहन्यन्ते प्रायः प्रगतिमनसः शुभंकरशम्बूकाः ।।४१।।

चित्रतारकाः

चित्रनायक नायिके युवयोः रसोर्मिकयौवनं
प्राणचित्ररथे चिरं चरथो मनोम्बुजचर्चितौ ।
मन्दिरे क्व नु देवताः स्वयमेव गतौ सुरजीवनं
नित्यभक्तिरतौ तु वां नरयोषितौ चरणार्पितौ ॥

काममात्मकलाकृतौ हि निधाय वां हृदये यदा
चारुतां चिररञ्जनीं सृजथो मुदामृतभाषणैः ।
प्राक्तनाचरणं नृणां विधिसम्मतं दलथस्तदा
चित्रमत्र तथापि किं नियतेश्छले पतथः शनैः ॥

प्रायशो दयितासुतान् तनयापती बत लीलया
विस्मृतौ त्यजथो गृहे स्वनिरंकुशाभ्रमणाय वै ।
स्वैरिणी कितवः कृतौ शरणं युवां रसवाञ्छया
किं कलंकितकुंकुमं ध्रियते तनौ मतमानवैः ?

हन्त चित्रनिकेतने मनुजा गता दरमेखलाम् !
धिङ् मनोजविमर्दितान् चलमंचके कुशलां कलाम् !!४२॥

देशनायकाः

विष्णोरवतारो भवेद्धि धरण्यां देशतारणमतिः
कृत्स्नं दशरूपं लसद्ध समन्तात् साम्प्रतं विकसितम् ।
मत्स्यो वरकूर्मौ वराहनृसिंहौ वामनो भृगुपतिः
रामो बलदेवः सगौतमकल्कीतिक्रमात् प्रकटितम् ॥

मीनव्यपदेशः करोति सुरायां स्नानकेलिमनिशं
कूर्मेण सुगुप्तं वचः खलवृत्तं मानसं च निभृते ।
दुर्वारवराहो भिनति हि दन्तै रात्मशत्रुमहिषं
निस्त्रिंशनृसिंहो निहन्ति बलोनं सर्वदा निजकृते ॥

आसिन्धुधरित्रीं त्रिविक्रमरूपः कांक्षते कलयितुं
छिन्ते भृगुपुत्रः प्रपञ्चकुठारैः कामिनीपरिकरान् ।
श्रीरामशरीरो जहाति सुजायां प्रेमिकां वरयितुं
मत्तो बलभद्रः प्रवञ्चयते नः प्राकृतान् हलधरान् ॥

बुद्धो हतबुद्धिः सहिंसपरीतः कल्की निर्माति यूपम् ।
एको दशरूपं बिभर्ति नृनेता वन्दे तं चित्ररूपम् ॥४३॥

महाप्रभुः

मण्डलेशः कलौ मानवव्यंसको भण्डसाधुः प्रसिद्धो
योहि नाम्ना प्रभुः सर्ववेत्ता गुरु र्नाविको मर्त्यसिन्धौ ।
धर्म आर्थव्रतो मर्मकामस्तथा तस्य मोक्षः सुसिद्धः
प्राप्य तेनेप्सितं विश्वबिम्बं सदा दृश्यते नीरविन्दौ ॥

कर्णधारो नृणां तारकच्छद्मना मन्त्रयन्नास्त इष्टं
कांक्षते त्वात्मनः शिष्यसाहायकैः प्रार्थनापूरणं सः ।
लंघये पंगुलं तुंगचूडामिति स्पर्धिवाक्यं सुमिष्टं
किन्तु वल्मीक आवल्गितुं न क्षमो ब्रह्मवंशावतंसः ।

रक्तकौषेयिणो वासनात्यागिनो वस्तुभोगस्त्वनन्तः
कामिनीकाञ्चने यद्यपि प्रेमिको मोदते कल्पनाधौ ।
भेकशब्दस्य तु प्राह्ममन्त्रै भृशं मन्द्रितः स्याद्दिगन्तः
ब्रह्म दृष्टं भवेत्तेन धीचक्षुषा प्रत्यहं किं समाधौ ॥

हन्त धर्मध्वज प्रायशः पांशुल क्वास्ति मोक्षस्त्वदीयः ।
कुत्र चान्धेन वा नीयतेऽविघ्नितो हीनचक्षुर्द्वितीयः ॥४४॥

राजपुरुषाः

हे राजपुरुषा जनमनोनायका नियते वरात्मजा
दीनो वरयते जगति वो भूयसा निजकाम्यसिद्धये ।
सोत्कोच-धनिकैः क्रियत आराधना त्वदर्थं गुहाध्वजा
जामातृमनमो दुहितृपाणिग्रहे पितरो मनन्त्यये ॥

सूत्रैररुणितैः समयमापृच्छसे दिवसेऽपि तन्द्रितः
स्वार्थार्चकवरैः कथमिहापास्यते शरणागतव्यथा ।
अर्थो हि सततं परमभोगेप्सुभिः पुरुषार्थको वृतः
चारित्रगुणभा कलुषदूरीकृता यशसस्तु का कथा ॥

नीतिः शठकृतिः किमपि चौर्यादिकं चिरचित्तरञ्जकं
धर्माधिकरणे मरणमार्तश्रितं गणयन्ति दुर्बलाः ।
पश्यामि नियतं पुरनरारक्षकं हि करालभक्षकं
पाञ्चालतनया विकलिता कीचकैः रुदती बृहन्नला ॥

चण्डालचरितं किमिति नो मार्गितं नृपकर्मचारिभिः ।
कालान्तपुरुषः स्वपिति जागर्ति वा विदितं न पापिभिः ॥४५॥

अमृतसुताः

शृण्वन्तु विश्वेऽमृतस्य पुत्रा मर्त्यवासिनां क्रन्दनं
कुत्रापि चेत्ते वसन्ति तन्द्रां जागरं मुदा संश्रिताः।
दिव्ये न धाम्नि स्थिति मराणां स्थूलवस्तुगं दर्शनं
ब्रह्म क्व दीप्तं क्व वा सुराख्या मुग्धमानवैः पूजिताः॥

आदित्यवर्णं तमःपरस्ताद् विद्यते यदि ब्रह्म नः
चैतन्यसत्त्वं गुणैर्विहीनं कल्पनाधृतं निश्चितम्।
वाक्येन तस्मान् निवर्तितं स्याद् देहिनश्च दीनं मनः
नानन्दरूपं न चिन्मयं वा शब्दमात्रमाकर्णितम्॥

वेदान्तसूत्रे प्रपञ्चवृत्तं भाष्यकारिणा वर्णितं
दुर्ज्ञेयमाया भ्रमस्वरूपा सर्जने नरीनृत्यते।
ब्रह्मैव पश्येद् विभुं गुणाढ्यं सात्मदेहभिर्वेष्टितं
वस्तुप्रकारोऽनृतो विवर्तो रज्जुसर्पवद् वर्तते॥

वाच्यं न यत्तत् प्रभाषितुं स्याद् वैतण्डिकानां चेष्टनम्।
रुद्धौष्ठमौनं श्रयेत गुह्यं वैदान्तिकानां दर्शनम्॥४६॥

चन्द्रजयः

विश्वे विज्ञाता खलु विमलयशाः स्निग्धकान्ति र्हिमांशु-
र्यस्य ज्योत्स्नायाः सुरनरपुलकं जायते शुक्लरात्राम् ।
दृष्ट्वा यस्याभां प्रियमुखहसिते केलिसद्मन्युपांशु
स्वर्लोकोद्देशं सदयितमनुजा दिक्षु कुर्वन्ति यात्राम् ॥

देवाः प्रापुस्तं किल जलधितलाद् भास्वरं शृंगकेतुं
धत्ते पीयूषं चिरसुखजनकं दिव्यदेहे स वित्तम् ।
काले काले च क्षयमपि कुरुते कायकल्पस्य हेतुं
नूनं प्रीणीते स मधुमदनयो र्ज्योतिषा युग्मचित्तम् ॥

व्योम्नि प्रद्योतं विदितमिह पुरा पुष्पकाख्यं खयानं
जातं तादृक्षं कविजनमनसश्चिन्तनादेव शङ्के ।
सृष्टं हीदानीं रथकृतिकुशलैः स्यन्दनं द्युप्रयाणं
यस्मिन् स्थित्वा न भ्रमणविलसितः स्यां सुधांशोः किमङ्के ॥

प्राप्तं चन्द्रस्य प्रदहनजकिणं मर्मरास्यं विरक्तम् !
हा हन्त प्रेम्णो विरहमिलनयो र्मार्मिकः कोऽद्य नक्तम् !!४७॥

जयपराजयौ

नरभोग्याऽद्य सपर्वता वसुमती मर्यादयो निर्जिता
मणिमुक्ताकृते विशन्ति जलगाश्चागाधरत्नाकरम् ।
खनिजाय श्रमिकै र्धरोदरदरे पथ्यालया निर्मिता
विजयन्ते मनुजाः सपुष्पकरथा व्योम्नः प्रभुं खेचरम् ॥

गगनं गच्छति धूमकेतुतुलनं यानं तडिच्चालितं
प्रतिपन्नो हि नृणां सुरेन्द्रसुलभः क्रान्तिरयो लीलया ।
किमु छायासरणिः पदाहतिभया नक्षत्रमाकम्पितं
किमु रोरुद्यत ईप्सिता मरनरै र्नीहारिका व्रीडया ॥

विदितं काममये नृभिः सुरजयै र्विश्वं वहिः साम्प्रतं
रचिता यन्त्रचयाः सुशिल्पकृतिभि श्चित्रादयो मूर्तयः ।
परमद्यापि परन्तपै र्न तु निजं मत्तेन्द्रियं संयतं
क्रियते चाणविकैः करालविशिखै र्मन्ये धरण्या लयः ॥

विजयं सूचयते क्रतुः क्व जगतः सासूयकालान्तकः ?
अनिशं प्रेमचरुं ददान इह वै स्याद्राजसूयात्मकः ॥४८॥

रौरवेशः

उक्ता कल्पकथा प्रतीच्यजगतः काव्ये हि पौराणिके
धात्रा सृष्टमभून् निजच्छविसमं रूपं नृणां सुन्दरम् ।
दिव्यार्चिः परमं विभाति नियतं रिक्ताम्बरेऽङ्गादिके
प्रेम्णा किंचन देवदूततुलनं पुण्यं मनुष्यान्तरम् ॥

रम्योद्यानमथ श्रितं विचरता भूनन्दनं पुष्कलं
कुञ्जान्तः पुरुषश्चिरं निवसते पत्न्या समं सस्मितः ।
आस्वाद्य प्रथमं भुजंगकितवाज् ज्ञानद्रुमाप्तं फलं
गीत्वाहो किल रौरवेन्द्रविजयं स्वर्गात् स निर्वासितः ॥

ईभादामसुताः प्रयाति समये जाता भृशं पांशुलाः
स्ववर्चो विगतं तनुः सुललिता प्राप्नोति पापाञ्जनम् ।
कौटिल्यं ज्वलितं करालनयने जिह्वा न वाङ्मञ्जुला
पश्येश्चोरसि गर्जयन्तमनिशं सर्पं जिघांसाफणम् ॥

घृण्याघ्र्येण नृरक्तकेन धरणौ विश्वेश्वरोऽभ्यर्थितः ।
स्वभ्राता निहतश्च रौरवपतिः सद्यो मनुष्यैर्जितः ॥४६॥

युगधर्मः

आ सृष्टेर्नित्यं विपुलनरकुले पापिन श्छद्मसज्जाः
कूटात्मा हृष्टः स्मितशुचिवदनः कञ्चुको यस्य धर्मः ।
स्रष्टा चेदास्ते स सजलनयनो भूयसी तस्य लज्जा
चित्रं मन्येऽहं किमपि विचलितं रौरवाधीशमर्म ॥

रिक्तेऽस्मिन् देशे नियतमपि कृता निन्दिता घृण्यखेला
मूढा वा जिह्वा स्तिमिरदरहता रक्तपातप्रहृष्टाः ।
हिंस्त्रै र्घोरान्धैः रणकलमुखरैः साध्यते धर्महेला
मिथ्या जाता हि त्रिदिववरसुताः कृष्णसिद्धार्थखृष्टाः ॥

अप्रेमा धर्मो विकटशठवृतो वर्तते पापजन्यो
भूतार्थं वक्ष्ये नवयुगवरणं साम्प्रतं कण्ठकम्बुः ।
विश्वस्य क्वास्ति प्रभुरतिकरुणः सर्वशक्तिः शरण्यः
स्रष्टा स्वप्नात्मा शिशुभयरचितो मर्त्यजो हि स्वयम्भूः ॥

अस्राव्यं व्यर्थं सहृदयकुसुमं पादयोः पुत्तलस्य ।
स्तौमि श्रद्धाहं ह्यतिनरचरणं सम्भवो नाद्य यस्य ॥५०॥

समाप्तमिदं काव्यम्

छन्दोनिर्धारणः

(* तारकाचिह्नितानि वृत्तानि ग्रन्थकारकृतानि)

सेस्तवकांकः			वृत्तम्
मांगलिकी	....	....	सुमंगला*
१	....	....	मञ्जुध्वनिः*
२	....	....	कम्बुनादः*
३	....	....	कम्बुनादः*
४	....	....	कम्बुनादः*
५	....	....	कम्बुनादः*
६	....	....	मञ्जुध्वनिः*
७	....	....	तूर्यमन्द्रा*
८	....	....	शार्दूलविक्रीडितम्
९	....	....	मेघमन्द्रा*
१०	....	....	मेघविस्फूर्जिता
११	....	....	सुमंगला*
१२	....	....	सुमधुरा
१३	....	....	शार्दूलविक्रीडितम्
१४	....	....	सुरसा
१५	....	....	शार्दूलविक्रीडितम्

संस्तवकांकः			वृत्तम्
१६	....	....	चित्रलेखा
१७	....	....	नन्दनम्
१८	....	....	शार्दूलविक्रीडितम्
१९	....	....	शार्दूलललितम्
२०	....	....	नाराचः
२१	....	...	समुद्रतता
२२	....	....	पञ्चचामरः
२३	....	....	बिम्बम्
२४	....	...	तडिल्लता*
२५	....	....	शार्दूलविक्रीडितम्
२६	....	....	व्याघ्रविभ्रमः*
२७	....	....	छाया
२८	....	....	फुल्लदाम
२९	....	....	कुसुमलतावेल्लिता
३०	....	....	मत्तमातङ्गः*
३१	....	....	शार्दूलविक्रीडितम्
३२	....	....	सुमंगला*
३३	....	....	पम्पास्मितम्*
३४	....	....	जयन्तिका*
३५	....	....	शम्पाहासः*
३६	....	....	शार्दूलविक्रीडितम्

संस्तवकांकः	वृत्तम
३७	बिम्बम्
३८	लज्जावती*
३९	सोमलता*
४०	जयनादः*
४१	मकरन्दिका
४२	हरनर्तनम्
४३	दीपान्विता*
४४	अनुराधा*
४५	नृत्तपदा*
४६	नूपुरझंकृतम्*
४७	फुल्लदाम
४८	मत्तेभविक्रीडितम्
४९	शार्दूलविक्रीडितम्
५०	फुल्लदाम

डॉ० वीरेन्द्रकुमारभट्टाचार्य-प्रणीता

वै ज य न्ती - ग्र न्थ मा ला

कवि-कालिदासम्

—नाटकम्—

ओमरखैयामम्

—काव्यम्—

संस्तवक-पंचाशिका

—काव्यम्—

—०—

प्रकाश्यमानौ ग्रन्थौ

शार्दूलशकटम्

—नाटकम्—

सिद्धार्थचरितम्

—नाटकम्—

संस्कृत पुस्तक भाण्डार

कलिकाता

OPINIONS ABOUT KAVI-KĀLIDĀSAM

Unstinted praise is due to the author for delineating the genesis and development of the poetic genius of Kālidāsa The invention of many a new metre testifies to his own creative genius. —Dr. Gopikamohan Bhattacharyya in **Samskrita-Sāhitya-Parishat**

A wonderful synthesis of the delicate rhythm of the Sanskrit language and the expression of a wealth of ideas shows the author's powerful intellect engaged in the creation of a work of art. The jacket design and other illustrations in the volume by Baijayanti Bhattacharya are elegant and pleasing.

—Dr. Ramaranjan Mukherji in **Amrita Bazar Patrika**

The author has originality of style, freshness of imagination and depth of poetic sentiment. The book proves that modern ideas can be expressed with ease and elegance in Sanskrit just as in any modern Indian Language. —**Ananda Bazar Patrika**

The dramatist has in seven Acts displayed both the external form and the inner soul of the literary genius of the Great Poet. Scholars are sure to congratulate him on the contribution of an invaluable treasure to modern Sanskrit literature. —**Yugāntar**

The author has profound knowledge of Sanskrit and his **Kavi-Kālidāsam** is a veritable creeper of fame.

--Howrah Pandit Samaj **Mānapatra**

The drama is expected to prove a success on the stage because of its variety ef events, unfoldment of character and quick movement. ...The style is modern and the nature of art, too, has been discussed incidentally. —**Monthly Basumati**

The drama will make the author famous because of his creative imagination, delicate humour and witty dialogues.

—Pandit Srijiva Nyayatirtha of Bhatpara

The book has impressed me much by freshness of plot charm of dialogue and—above all—by grace of new metres introduced by the dramatist.

—Dr. Satkari Mookerjee, formerly of Calcutta University

A perusal of the book has given me great pleasure for three reasons: its beautiful language, its compact plot, and the characterisation of Kālidāsa with sincere reverence.

—Dr. Hiranmoy Banerjee, Vice-Chancellor, Rabindra Bharat

It is a wonderful thing that the author has done. His **Kavi-Kālidāsam** has already caught the imagination of many worthy persons. Hats off to him!

—Dr. Kalidas Bhattacharyya, Vice-Chancellor, Visva-Bharati